| | | | |
|---|---|---|---|
| जिन्वम् २, जिन्वित्वा २, | जिन्वम् २, जिन्वयित्वा २, | जिजिन्विषम् २, जिजिन्विषित्वा २, | जेजिन्वम् २; जेजिन्वित्वा २. |

## (605) "जिषु सेचने" (I-भ्वादिः-697. सक. सेट्. पर.)

जेषकः-षिका, जेषकः-षिका, जिजेषिषकः-जिजिषिषकः-षिका, जेजिषकः-षिका;

जेषिता-त्री, जेषयिता-त्री, जिजेजिषिता-जिजिषिषिता-त्री, जेजिषिता-त्री;
इत्यादीनि सर्वाण्यपि रूपाणि जिमधातुवत् (602) बोध्यानि।
निष्ठायाम्-[1]जिष्टम्-ष्टः-ष्टवान्, क्विपि-[2]प्रजिट्-प्रजिड्, क्त्वायाम्-[3]जेषित्वा-जिषित्वा-जिष्ट्वा; इति रूपाणि भवन्ति।

## (606) "जीव प्राणधारणे" (I-भ्वादिः-562. अक. सेट्. पर.)

धात्वर्थसङ्गृहीतकर्मत्वेनास्य धातोरकर्मकत्वम्।

जीवकः-विका, जीवकः-विका, जिजीविषकः-षिका, जेजीवकः-विका;
जीविता-त्री, जीवयिता-त्री, जिजीविषिता-त्री, जेजीविता-त्री;
जीवन्-न्ती, [4]मा [A]जीवन्, जीवयन्-न्ती, जिजीविषन्-न्ती; —
जीविष्यन्-न्ती-ती, जीवयिष्यन्-न्ती-ती, जिजीविषिष्यन्-न्ती-ती; —
— — — जेजीव्यमानः-जेजीविष्यमाणः;
[5]प्रज्यूः-प्रज्युवौ-प्रज्युवः; — —
जीवितम्-तः, जीवितः, जिजीविषितः, जेजीवितः-तवान्;

---

1. उदित्त्वेन क्त्वायामिड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्णिषेधः।
2. 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वेन षकारस्य डकारः। चर्त्वविकल्पः।
3. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे 'रलो व्युपधात्—' (1-2-26) इति कित्त्वविकल्पः। तेन रूपत्रयम्।
4. 'माङ्याक्रोश इति वक्तव्यम्' (वा. 3-2-124) इति शता।
5. क्विपि, 'च्छ्वोः शूडनुनासिके च' (6-4-19) इत्यूडादेशे, ईकारस्य यणि रूपम्। एवं क्तिन्प्रत्ययेऽपि प्रक्रिया बोध्या।

A. 'मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति।' शिशुपालवधे 2.45.